श्री वेंकटेश्वर वज्रकवच स्तोत्रं

श्री वेंकटेश्वर वज्रकवच स्तोत्रं

मार्कंडेय उवाच |
नारायणं परब्रह्म सर्वकारणकारणं |
प्रपद्ये वेंकटेशाख्यं तदेव कवचं मम || 1 ||

सहस्रशीर्षा पुरुषो वेंकटेशश्शिरोऽवतु |
प्राणेशः प्राणनिलयः प्राणान् रक्षतु मे हरिः || 2 ||

आकाशराट्सुतानाथ आत्मानं मे सदावतु |
देवदेवोत्तमो पायाद्देहं मे वेंकटेश्वरः || 3 ||

सर्वत्र सर्वकालेषु मंगांबाजानिरीश्वरः |
पालयेन्मां सदा कर्मसाफल्यं नः प्रयच्छतु || 4 ||

य एतद्वज्रकवचमभेद्यं वेंकटेशितुः |
सायं प्रातः पठेन्नित्यं मृत्युं तरति निर्भयः || 5 ||

इति मार्कंडेय कृत श्री वेंकटेश्वर वज्रकवच स्तोत्रं |